# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ४५

अकम्पनवधं श्रुत्वा क्रुद्धो वै राक्षसेश्वरः ।
किं चिद्दीनमुखश्चापि सचिवांस्तानुदैक्षत ॥ १॥

स तु ध्यात्वा मुहूर्तं तु मन्त्रिभिः संविचार्य च ।
पुरीं परिययौ लङ्कां सर्वान्गुल्मानवेक्षितुम् ॥ २॥

तां राक्षसगणैर्गुप्तां गुल्मैर्बहुभिरावृताम् ।
ददर्श नगरीं लङ्कां पताकाध्वजमालिनीम् ॥ ३॥

रुद्धां तु नगरीं दृष्ट्वा रावणो राक्षसेश्वरः ।
उवाचामर्षितः काले प्रहस्तं युद्धकोविदम् ॥ ४॥

पुरस्योपनिविष्टस्य सहसा पीडितस्य च ।
नान्यं युद्धात्प्रपश्यामि मोक्षं युद्धविशारद ॥ ५॥

अहं वा कुम्भकर्णो वा त्वं वा सेनापतिर्मम ।
इन्द्रजिद्वा निकुम्भो वा वहेयुर्भारमीदृशम् ॥ ६॥

स त्वं बलमितः शीघ्रमादाय परिगृह्य च ।
विजयायाभिनिर्याहि यत्र सर्वे वनौकसः ॥ ७॥

निर्याणादेव ते नूनं चपला हरिवाहिनी ।
नर्दतां राक्षसेन्द्राणां श्रुत्वा नादं द्रविष्यति ॥ ८॥

चपला ह्यविनीताश्च चलचित्ताश्च वानराः ।
न सहिष्यन्ति ते नादं सिंहनादमिव द्विपाः ॥ ९॥

विद्रुते च बले तस्मिन्रामः सौमित्रिणा सह ।
अवशस्ते निरालम्बः प्रहस्तवशमेष्यति ॥ १०॥

आपत्संशयिता श्रेयो नात्र निःसंशयीकृता ।
प्रतिलोमानुलोमं वा यद्वा नो मन्यसे हितम् ॥ ११॥

रावणेनैवमुक्तस्तु प्रहस्तो वाहिनीपतिः ।
राक्षसेन्द्रमुवाचेदमसुरेन्द्रमिवोशना ॥ १२॥

राजन्मन्त्रितपूर्वं नः कुशलैः सह मन्त्रिभिः ।
विवादश्चापि नो वृत्तः समवेक्ष्य परस्परम् ॥ १३॥

प्रदानेन तु सीतायाः श्रेयो व्यवसितं मया ।
अप्रदाने पुनर्युद्धं दृष्टमेतत्तथैव नः ॥ १४॥

सोऽहं दानैश्च मानैश्च सततं पूजितस्त्वया ।
सान्त्वैश्च विविधैः काले किं न कुर्यां प्रियं तव ॥ १५॥

न हि मे जीवितं रक्ष्यं पुत्रदारधनानि वा ।
त्वं पश्य मां जुहूषन्तं त्वदर्थे जीवितं युधि ॥ १६॥

एवमुक्त्वा तु भर्तारं रावणं वाहिनीपतिः ।
समानयत मे शीघ्रं राक्षसानां महद्बलम् ॥ १७॥

मद्बाणाशनिवेगेन हतानां तु रणाजिरे ।
अद्य तृप्यन्तु मांसेन पक्षिणः काननौकसाम् ॥ १८॥

इत्युक्तास्ते प्रहस्तेन बलाध्यक्षाः कृतत्वराः ।
बलमुद्योजयामासुस्तस्मिन्राक्षसमन्दिरे ॥ १९॥

सा बभूव मुहूर्तेन तिग्मनानाविधायुधैः ।
लङ्का राक्षसवीरैस्तैर्गजैरिव समाकुला ॥ २०॥

हुताशनं तर्पयतां ब्राह्मणांश्च नमस्यताम् ।
आज्यगन्धप्रतिवहः सुरभिर्मारुतो ववौ ॥ २१॥

स्रजश्च विविधाकारा जगृहुस्त्वभिमन्त्रिताः ।
सङ्ग्रामसज्जाः संहृष्टा धारयन्राक्षसास्तदा ॥ २२॥

सधनुष्काः कवचिनो वेगादास्फुत्य राक्षसाः ।
रावणं प्रेक्ष्य राजानं प्रहस्तं पर्यवारयन् ॥ २३॥

अथामन्त्र्य च राजानं भेरीमाहत्य भैरवाम् ।
आरुरोह रथं दिव्यं प्रहस्तः सज्जकल्पितम् ॥ २४॥

हयैर्महाजवैर्युक्तं सम्यक्सूतसुसंयुतम् ।
महाजलदनिर्घोषं साक्षाच्चन्द्रार्कभास्वरम् ॥ २५॥

उरगध्वजदुर्धर्षं सुवरूथं स्वपस्करम् ।

सुवर्णजालसंयुक्तं प्रहसन्तमिव श्रिया ॥ २६ ॥

ततस्तं रथमास्थाय रावणार्पितशासनः ।
लङ्कायाः निर्ययौ तूर्णं बलेन महता वृतः ॥ २७ ॥

ततो दुन्दुभिनिर्घोषः पर्जन्यनिनदोपमः ।
शुश्रुवे शङ्खशब्दश्च प्रयाते वाहिनीपतौ ॥ २८ ॥

निनदन्तः स्वरान्घोरान्राक्षसा जग्मुरग्रतः ।
भीमरूपा महाकायाः प्रहस्तस्य पुरःसराः ॥ २९ ॥

व्यूढेनैव सुघोरेण पूर्वद्वारात्स निर्ययौ ।
गजयूथनिकाशेन बलेन महता वृतः ॥ ३० ॥

सागरप्रतिमौघेन वृतस्तेन बलेन सः ।
प्रहस्तो निर्ययौ तूर्णं क्रुद्धः कालान्तकोपमः ॥ ३१ ॥

तस्य निर्याण घोषेण राक्षसानां च नर्दताम् ।
लङ्कायां सर्वभूतानि विनेदुर्विकृतैः स्वरैः ॥ ३२ ॥

व्यभ्रमाकाशमाविश्य मांसशोणितभोजनाः ।
मण्डलान्यपसव्यानि खगाश्चक्रू रथं प्रति ॥ ३३ ॥

वमन्त्यः पावकज्वालाः शिवा घोरा ववाशिरे ॥ ३४ ॥

अन्तरिक्षात्पपातोल्का वायुश्च परुषो ववौ ।
अन्योन्यमभिसंरब्धा ग्रहाश्च न चकाशिरे ॥ ३५ ॥

ववर्षू रुधिरं चास्य सिषिचुश्च पुरःसरान् ।
केतुमूर्धनि गृध्रोऽस्य विलीनो दक्षिणामुखः ॥ ३६ ॥

सारथेर्बहुशश्चास्य सङ्ग्राममवगाहतः ।
प्रतोदो न्यपतद्धस्तात्सूतस्य हयसादिनः ॥ ३७ ॥

निर्याण श्रीश्च यास्यासीद्वास्वरा च सुदुर्लभा ।
सा ननाश मुहूर्तेन समे च स्खलिता हयाः ॥ ३८ ॥

प्रहस्तं त्वभिनिर्यान्तं प्रख्यात बलपौरुषम् ।
युधि नानाप्रहरणा कपिसेनाभ्यवर्तत ॥ ३९ ॥

अथ घोषः सुतुमुलो हरीणां समजायत ।
वृक्षानारुजतां चैव गुर्वीश्चागृह्णतां शिलाः ॥ ४० ॥

उभे प्रमुदिते सैन्ये रक्षोगणवनौकसाम् ।
वेगितानां समर्थानामन्योन्यवधकाङ्क्षिणाम् ।
परस्परं चाह्वयतां निनादः श्रूयते महान् ॥ ४१ ॥

ततः प्रहस्तः कपिराजवाहिनीम्
अभिप्रतस्थे विजयाय दुर्मतिः ।
विवृद्धवेगां च विवेश तां चमूं
यथा मुमूर्षुः शलभो विभावसुम् ॥ ४२ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com